प्रातिपदिकत्वम्

प्रातिपदिकं नाम किम् अपि च केन प्रातिपदिकत्वं सिध्यति इति विषये चिन्तनं भवतु | संस्कृतभाषायां पदं द्विविधम्— सुबन्तं तिङन्तञ्च | यस्य पदस्य अन्ते सुप्-प्रत्ययः अस्ति, तत् सुबन्तम्; यस्य पदस्य अन्ते तिङ्-प्रत्ययः अस्ति, तत् तिङन्तम् |

**सुप्तिङन्तं पदम्** (१.४.१४) = सुबन्तानां तिङन्तानां च पदसंज्ञा भवति |

तर्हि यस्य पदस्य अन्ते सुप्-प्रत्ययः अस्ति, तत् सुबन्तम्; यस्य पदस्य अन्ते तिङ्-प्रप्रत्ययः अस्ति, तत् तिङन्तम् | एकविंशतिः सुप्-प्रत्ययाः सन्ति; अष्टादश तिङ्-प्रत्ययाः सन्ति |

तिङन्तपदम्

धातुभ्यः तिङ्-प्रत्ययानां योजनेन तिङन्तपदम्— नाम क्रियापदम्— निष्पन्नम् |

लाधिकार-प्रसङ्गे धातुतः लस्य (ल् इत्यस्य) स्थाने अष्टादश तिङ्-प्रत्ययाः विहिताः |

**लस्य** (३.४.७७) = अधिकारसूत्रम् इदम् | षष्ठ्यन्तम् | अकारः उच्चारणार्थः | ३.४.७८ – ३.४.११२ पर्यन्तम् अस्य अधिकारः | प्रत्येकस्मिन् सूत्रे उपविश्य वदति यत् तत्तत्सूत्रे यः प्रत्ययः विहितः, सः लस्य (ल् इत्यस्य) स्थाने विहितः |

**तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ** (३.४.७८) = तिङन्तपदानां साधनार्थं मूले अष्टादश तिङ् प्रत्ययाः भवन्ति | **लस्य** इत्यनेन ल् इत्यस्य स्थाने एते अष्टादश विहिताः | **तिप् तस् झि, सिप् थस् थ, मिप् वस् मस्, त आताम् झ, थास् आथाम् ध्वम्, इड् वहि महिङ्** इति अष्टादश तिङ् प्रत्ययाः | तिप् इत्यस्मात् आरभ्य महिङ् पर्यन्तम्, आहत्य तिङ्-प्रत्ययाः इत्युच्यते |

तर्हि क्रियापदस्य निर्माणार्थं धातुतः तिङ्-प्रत्ययाः विहिताः |

सुबन्तपदम्

नामपदस्य निर्माणार्थं का गतिः ? तत्र प्रातिपदिकात् सुप्-प्रत्ययाः विहिताः | अत्र मूलविचारः एवं यत् तदा सुप्-प्रत्ययाः आगन्तुं योग्याः यदा पूर्वं स्थितस्य भागस्य प्रातिपदिकसंज्ञा भवति | प्रातिपदिकसंज्ञा नास्ति चेत् सुप्-प्रत्ययाः न विहिताः | अतः सुबन्तपदस्य निर्माणार्थं प्रातिपदिकम् अत्यावश्यकम् | सारांशः एवं यत् प्रातिपदिकं तद् अस्ति यस्मात् सुप्-प्रत्ययाः विहिताः |

सुप्-प्रत्ययाः सङ्ख्यया एकविंशतिः, ते च एते—

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) =
**स्वौ-जसमौट्-छष्टाभ्याम्-भिस्-ङे-भ्याम्-भ्यस्-ङसि-भ्याम्-भ्यस्-ङसोसाम्-ङ्योस्-सुप्**

| | | |
|---|---|---|
| सु | औ | जस् |
| अम् | औट् | शस् |
| टा | भ्याम् | भिस् |
| ङे | भ्याम् | भ्यस् |
| ङसि | भ्याम् | भ्यस् |
| ङस् | ओस् | आम् |
| ङि | ओस् | सुप् |

अधुना प्रातिपदिकसंज्ञा कथं कुत्र सिद्धा इति अग्रे अवलोकयाम | प्रातिपदिक-विधायक-सूत्रद्वयम् अस्ति, परिभाषा च एका |

प्रातिपदिकविधायकसूत्रे द्वे

**१. अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) = अर्थवत् शब्दस्वरूपं यत् धातुः, प्रत्ययः, प्रत्ययान्तं च नास्ति, तस्य प्रातिपदिकसंज्ञा भवति। अर्थः अस्य अस्ति इति अर्थवत्, मतुप्–प्रत्ययः। न धातुः अधातुः, न प्रत्ययः अप्रत्ययः, नञ्तत्पुरुषः। अर्थवत् प्रथमान्तम्, अधातुः प्रथमान्तम्, अप्रत्ययः प्रथमान्तं, प्रातिपदिकं प्रथमान्तम्, अनेकपदमिदं सूत्रम्। सूत्रं स्वयं पूर्णम्— **अर्थवद् अधातुः अप्रत्ययः प्रातिपदिकम्** ।

अस्मिन् सूत्रे वस्तुतः **अप्रत्यय**–पदस्य द्विवारम् आवृत्तिः। **अप्रत्ययः अप्रत्ययः**। प्रथमवारं "प्रत्ययः न स्यात्" इत्यर्थः। द्वितीयवारं "प्रत्ययान्तं न स्यात्" इत्यर्थः। तत्र **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः भवति; अनेन अप्रत्ययान्तम् इत्यर्थः निष्पन्नः। (अत्र **संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति** (परिभाषा #२७) इत्यनया परिभाषया तदन्तविधि–प्रतिषेधः न भवति यतोहि प्रत्यय–विशेषस्य (सुप्, तिङ्, कृत्, इत्यादीनां) संज्ञा इति प्रसङ्गो नास्ति। अनया परिभाषया संज्ञासूत्रेण यदा प्रत्ययनामकरणं भवति तदा सा संज्ञा केवलं प्रत्ययस्य न त तदन्तस्य।)

अनेन सूत्रेण संस्कृतभाषायां यत् किमपि शब्दस्वरूपम् अर्थवत् अस्ति— परन्तु धातुभिन्नं, प्रत्ययभिन्नं, प्रत्ययान्तभिन्नं च— तत् प्रातिपदिकम्। यत्र व्युत्पत्ति–प्रक्रिया नास्ति— यत्र प्रकृति–प्रत्ययः सम्बन्धो नास्ति अतः "प्रत्ययान्तं" नास्ति— तत्र अनेन सूत्रेण प्रातिपदिकसंज्ञा। यत्र व्युत्पत्ति–प्रक्रिया अस्ति— प्रकृतिः अस्ति यस्याः प्रत्ययः विहितः— तत्र अग्रिमेण सूत्रेण प्रातिपदिकसंज्ञा (**कृत्तद्धितसमासाश्च**)। अतः अत्र मार्गद्वयम् अस्ति— अव्युत्पन्नशब्दानां, व्युत्पन्नशब्दानाञ्च।

**२. कृत्तद्धितसमासाश्च** (१.२.४६) = कृदन्ताः, तद्धितान्ताः, समासाः च अपि प्रातिपदिकसंज्ञकाः। कृच्च, तद्धितश्च, समासश्च, कृत्तद्धितसमासाः इतरेतरद्वन्द्वः। कृत्तद्धितसमासाः प्रथमान्तं, च अव्ययपदं, द्विपदमिदं सूत्रम्। **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यस्मात् **अर्थवत्, प्रातिपदिकम्** इत्यनयोः अनुवृत्तिः। अनुवृत्ति–सहित–सूत्रम्— **अर्थवन्तः कृत्तद्धितसमासाः च प्रातिपदिकानि** ।

अनेन सूत्रेण—
१) धातुतः कृत्–प्रत्ययस्य विधानेन यत् रूपं निष्पन्नं तत् प्रातिपदिकम् (कृदन्तम्)।
२) धातुभिन्न–प्रकृतितः प्रत्ययस्य विधानेन यत् रूपं निष्पन्नं तत् प्रातिपदिकम् (तद्धितान्तम्)।
३) पदानि यत्र समस्यन्ते तत्र नूतनतया निष्पन्नरूपं प्रातिपदिकम् (समासः)।

धेयं यत् यद्यपि अस्मिन् सूत्रे "कृत्" "तद्धित" इत्युक्तम्, तथापि कृत्–प्रत्ययः तद्धित–प्रत्ययः इर्यर्थो न अपि तु येषां रूपाणाम् अन्ते इमे प्रत्ययाः सन्ति। वैयाकरणैः उक्तं यत् **अर्थवत्** इत्यस्य अनुवृत्तिः अस्ति— कृत्–प्रत्ययाः तद्धित–प्रत्ययाः स्वयं नार्थवन्तः; यदा प्रकृतेः विहिताः तदा व्युत्पन्नं रूपम् अर्थवत् अतः अस्मिन् सूत्रे कृत् इत्युक्ते कृदन्तम्, अपि च तद्धित इत्युक्ते तद्धितान्तम्।

इदम् अपि धेयं यत् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** इति सूत्रेण प्रत्ययान्तस्य प्रातिपदिकसंज्ञा निषिध्यते। तदा **कृत्तद्धितसमासाश्च** इति सूत्रेण उक्तं यत् कृदन्तानि तद्धितान्तानि च प्रातिपदिकसंज्ञकानि। अतः प्रथमं सूत्रं सामान्यसूत्रं, द्वितीयसूत्रं विशेषसूत्रम्। द्वितीयं च प्रथमस्य अपवादः।

अन्ततः **कृत्तद्धितसमासाश्च** इति सूत्रेण समासः प्रातिपदिकसंज्ञकः। परन्तु समासः अर्थवान्, अधातुः, अप्रत्ययः, अप्रत्ययान्तः— अतः **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** इति सूत्रेण प्रातिपदिकसंज्ञा प्राप्यते। तर्हि "समासः" इति किमर्थम् उक्तम् **कृत्तद्धितसमासाश्च** इति सूत्रे ? आवश्यकता का ? उत्तरम् अस्ति, अनेन एकाधिक–शब्दस्वरूपैः अर्थपूर्णरूपं भवति चेत्, समासः एव स्यात् न तु वाक्यम्। नो चेत् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** इति सूत्रेण "रामः आपणं गच्छति" इत्यस्यापि प्रातिपदिकसंज्ञा भवति स्म। अतः "समासः" इत्यस्य कथनेन नियमयति— restriction क्रियते।

पुंसि नपुंसके च प्रकृति–प्रत्यययोः संयोजनेन यत् शब्दस्वरूपं निष्पन्नं, तस्य प्रातिपदिकसंज्ञा भवति **कृत्तद्धितसमासाश्च** इति सूत्रेण। अपि च यः कोऽपि व्युत्पन्नशब्दः मूले स्त्रीलिङ्गे अस्ति, तस्यापि प्रातिपदिकसंज्ञा अनेन सूत्रेण। यथा महिला–शब्दः मूलतः स्त्रियाम् एव अपि च व्युत्पन्नशब्दः अतः अनेन सूत्रेण प्रातिपदिकसंज्ञा। परन्तु छात्रा–शब्दः मूल–पुंलिङ्ग–छात्रशब्दात् आगतः, अतः अनेन

सूत्रेण न | व्युत्पन्न–छात्रशब्दस्य प्रातिपदिकसंज्ञा अनेन सूत्रेण; तदा स्त्री–प्रत्ययस्य संयोजनेन छात्रा भवति | छात्रा–शब्दस्य प्रातिपदिकसंज्ञा अधः स्थित–परिभाषया भवति |

अधिकारसूत्राणि

अधिकारसूत्रम् इत्युक्तौ तादृशं सूत्रं यस्य पूर्ण–रूपेण अनुवृत्तिः भवति बहुषु सूत्रेषु | नाम स्वयं कार्यं न करोति, अपि तु अपरेषु सूत्रेषु उपविश्य तेषाम् अर्थं पूरयति |

**१. प्रत्ययः** (३.१.१) = [अधिकारः ३.१.१ – ५.४.१६०] तृतीयः चतुर्थः पञ्चमः इत्येषु त्रिषु अध्यायेषु यत्र यत्र कस्यचित् विधानं भवति, तत्र तत्र **प्रत्ययः** आगत्य वदति यत् यस्य विधानं सञ्जातं, तस्य प्रत्यय–संज्ञा भवति | एषु त्रिषु अध्यायेषु विधिसूत्रं यत्र यत्र भवति, तत्र सर्वत्र अस्य सूत्रस्य अधिकारः | ३.१.१ – ५.४.१६० इत्येषु यत्र यत्र विधानम् अस्ति, तत्र तत्र प्रत्येकं सूत्रस्य अर्थे एवम् अन्वयः यत् यत् विहितं, तस्य प्रत्यय–संज्ञा भवति |

**२. परश्च** (३.१.२) = [अधिकारः ३.१.१ – ५.४.१६०] एषु एव त्रिषु अध्यायेषु यत्र यत्र **प्रत्ययः** इत्यनेन प्रत्यय–संज्ञा भवति, तत्र तत्र **परश्च** इति सूत्रम् अपि उपविश्य वदति यत् अयं प्रत्ययः प्रकृतेः अनन्तरम् आयाति |

**३. ङ्याप्प्रातिपदिकात्** (४.१.१) = [अधिकारः ४.१.१ – ५.४.१६०] | चतुर्थे पञ्चमे चाध्याययोः यावन्तः प्रत्यायाः विहिताः, ते सर्वे प्रातिपदिकेभ्यः, ङ्यन्तेभ्यः, आबन्तेभ्यः वा आयान्ति | ङ्यन्तरूपाणि आबन्तरूपाणि च स्त्रीलिङ्गरूपाणि इति | तर्हि आहत्य चतुर्थे पञ्चमे चाध्याययोः सर्वाणि सुबन्तविधायकसूत्राणि सन्ति; तेषु सर्वेषु यत् किमपि विहितं, **प्रत्ययः** इत्यनेन यः विहितः, तस्य नाम प्रत्ययः | अपि च यः विहितः, सः सर्वत्र प्रातिपदिकात्, ङ्यन्तात्, आबन्तात् वा विहितः भवति |

सूत्रस्य पदविच्छेदः—ङी च, आप् च, प्रातिपदिकञ्च, तेषां समाहारद्वन्द्वः, ङ्याप्प्रातिपदिकम्, तस्मात् ङ्याप्प्रातिपदिकात् | ङ्याप्प्रातिपदिकात् पञ्चम्यन्तम् एकपदमिदं सूत्रम् | त्रयः स्त्री–प्रत्ययाः सन्ति यैः ई–कारः विहितो भवति— ङीप्, ङीष्, ङीन् च | अस्मिन् सूत्रे "ङी" इत्यस्य कथनेन त्रयाणाम् अपि ग्रहणं भवति | त्रयः स्त्री–प्रत्ययाः सन्ति यैः आ–कारः विहितो भवति— टाप्, डाप्, चाप् च | अस्मिन् सूत्रे "आप्" इत्यस्य कथनेन त्रयाणाम् अपि ग्रहणं भवति |

परिभाषा

अधः एका परिभाषा अस्ति | परिभाषाः अत्यन्तं पुरातनाः; तेषां लेखकाः अस्माभिर्न ज्ञायन्ते परन्तु व्याकरणलोके तासां दृढा मान्यता अस्ति |

**प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्** (परिभाषा #७१) = यस्य रूपस्य प्रातिपदिकसंज्ञा भवति द्वाभ्यां प्रातिपदिकसंज्ञा–विधायक–सूत्राभ्याम् (**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च**), तस्मात् प्रातिपदिकात् यानि लिङ्गविशिष्ट–रूपाणि व्युत्पन्नानि भवन्ति स्त्रीत्व–बोधक–प्रत्ययानां योजनेन, तेषाम् अपि ग्रहणं भवति प्रातिपदिकसंज्ञया | यथा 'कर्तृ' इत्यस्य प्रातिपदिकसंज्ञा भवति, अतः 'कर्त्री' इत्यस्यापि प्रातिपदिकसंज्ञा भवति | तथा च 'छात्र' इत्यस्य प्रातिपदिकसंज्ञा भवति, अतः 'छात्रा' इत्यस्यापि प्रातिपदिकसंज्ञा भवति |

अनेन प्रातिपदिकस्य विधानार्थं सर्वाणि यन्त्राणि अस्माकं पुरतः सन्ति— द्वे सूत्रे, एका परिभाषा च | प्रातिपदिकम् अस्माकम् आधारः अस्ति अष्टाध्याय्याः चतुर्थे पञ्चमे च अध्याययोः, यत्र सुबन्तपदानां निष्पादनार्थं सर्वे प्रत्ययाः विहिताः सन्ति | तेषु सुप्–प्रत्ययाः प्रमुखाः | अधः त्रयाणाम् अधिकारसूत्राणां समर्थनेन सुप्–प्रत्ययानां विधानार्थम् अर्थपूर्णं वाक्यं सिद्धम्—

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्** (४.१.२) = **प्रत्ययः** (३.१.१), **परश्च** (३.१.२), **ङ्याप्प्रातिपदिकात्** (४.१.१) इत्येषाम् अधिकारः | अनुवृत्ति–सहित–सूत्रम्— **ङ्याप्प्रातिपदिकात् स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् प्रत्ययः परश्च** |

अधुना प्रातिपदिकस्य आधारः कः, कथं भवति इति अस्माभिः ज्ञातम् | अग्रिमेषु पाठेषु प्रातिपदिकस्य आधारेण कथं सुप्–प्रत्ययाः

युज्यन्ते सुबन्तपदस्य निष्पादनार्थम्, इति अवलोकयिष्यामः |

Swarup — Sept 2014

<u>परिशिष्टम्</u>

आलोचनक्रमे मनसि प्रश्नः उदेति यत् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यनेन कीदृशकार्यं विधीयते अपि च **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५), **कृत्तद्धितसमासाश्च** (१.२.४६) इति सूत्रयोः कीदृशसम्बन्धः |

प्रथमतया **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति सूत्रं स्वीकुर्मः | प्रश्नः अस्ति यत् अनेन सूत्रेण केवलं यस्य प्रातिपदिकसंज्ञा भवति तत् सूच्यते, अथवा यस्य प्रातिपदिकसंज्ञा न भवति तदपि सूच्यते ? नाम अत्र निषेधः भवति न वा ?

केषाञ्चित् मनसि स्यात् यत् "अत्र केवलं प्रातिपदिकसंज्ञा–ग्रहणस्य विषयः— नाम प्राप्तिः, न तु निषेधः" | एवं भवति चेत्, यः अर्थवान् किन्तु धातुः नास्ति, प्रत्ययः नास्ति, प्रत्ययान्तश्च नास्ति, तस्य प्रातिपदिकसंज्ञा भवति | परन्तु यः धातुः अथवा प्रत्ययः अथवा प्रत्ययान्तः अस्ति, तस्य प्रातिपदिकसंज्ञा निषिध्यते इति नास्ति |

तथा अस्ति चेत्, अस्मिन् सूत्रे शक्तिः न स्यात् | प्राप्तिरपि अस्ति, निषेधः अपि अस्ति | एवं नास्ति यत् "धातोः प्रातिपदिकसंज्ञा भवितुमर्हति, केवलम अनेन सूत्रेण न" | तथैव एवं नास्ति यत् "प्रत्ययस्य प्रातिपदिकसंज्ञा भवितुमर्हति, केवलम अनेन सूत्रेण न" | अथवा "प्रत्ययान्तस्य प्रातिपदिकसंज्ञा भवितुमर्हति, केवलम अनेन सूत्रेण न" | त्रिभिरपि प्रातिपदिकसंज्ञा निषिध्यते | 'अधातुः' इत्यस्य कथनेन पर्युदासः इति प्रतिषेधः | तथैव अप्रत्ययः, अप्रत्ययान्तः अपि | अनेन शक्तिरागच्छति यत् 'धातुः' अस्ति चेत्, प्रातिपदिकसंज्ञा न भवति, प्रत्ययः अस्ति चेत्, प्रातिपदिकसंज्ञा न भवति, प्रत्ययान्तः अस्ति चेत्, प्रातिपदिकसंज्ञा न भवति | केवलं धातुभिन्नस्य, प्रत्ययभिन्नस्य, प्रत्ययान्तभिन्नस्य च प्रातिपदिकसंज्ञा भवति |

**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इयनेन यस्य प्रातिपदिकसंज्ञा अपेक्षिता तस्य विधिः, यस्य च न भवेत् तस्य निषेधः | नञ् इत्यनेन त्रयाणां व्यावृत्तिः | अयं निषेधार्थः प्रतीतः, गम्यः | **अधातुरप्रत्ययः** इति शब्दे निहितमस्ति | शब्दस्य अर्थशक्त्या अयं बोधो जायते |

एते त्रयः अपि—धातुः, प्रत्ययः, प्रत्ययान्तः—अर्थवन्तः | परन्तु धातोः प्रातिपदिकसंज्ञा वति इति चेत्, समस्या जायते | हन्–धातोः लङ्–लकारे प्रथमपुरुषैकवचने 'अहन्' इति रूपस्य नकारलोपः भविष्यति **न लोपः प्रातिपदिकान्तस्य** (८.२.७) इति सूत्रेण | प्रत्ययः अपि अर्थवान् अतः तस्य प्रातिपदिकसंज्ञा–निषेधः आवश्यकः | प्रत्ययाः चतुर्विधाः— सुप्, तिङ्, कृत्, तद्धितः च | प्रत्ययान्तानां प्रातिपदिकसंज्ञा भवति चेत्, सुबन्तेभ्यः तिङन्तेभ्यश्च सुप्–प्रत्ययविधानम् आरप्स्यते | अतः अस्य सर्वस्य निवारणार्थं, स्पष्टीकरणार्थं च एषां त्रयाणां प्रातिपदिकसंज्ञा–निषेधः भवति | **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति सूत्रेण संज्ञा–प्राप्तिरपि अस्ति, संज्ञा–निषेधः अपि अस्ति | नञ् इत्यस्य कथनेन निषेधः | स च निषेधः द्विविधः; अग्रे उच्यते |

प्रत्ययान्तानाम् **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यनेन प्रातिपदिकसंज्ञा–निषेधः भवति इति कारणतः एव **कृत्तद्धितसमासाश्च** (१.२.४६) इत्यस्य आवश्यकता अस्ति | **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यनेन चतुर्णामपि प्रत्ययान्तानां प्रातिपदिकसंज्ञा–निषेधः— सुबन्तानां, तिङन्तानां, कृदन्तानां, तद्धितान्तानाञ्च | तदा कृदन्तानां, तद्धितान्तानां प्रातिपदिकसंज्ञा–साधनार्थम् अपवादभूतसूत्रं **कृत्तद्धितसमासाश्च** (१.२.४६) दीयते | अनेन फलितार्थो भवति यत् सुबन्तान् तिङन्तान् च त्यक्त्वा प्रत्ययान्तानां प्रातिपदिकसंज्ञा भवति | **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यनेन यदि प्रत्ययान्तनिषेधो न स्यात्, तर्हि एतादृशः अर्थः स्पष्टतया न जायेत |

अधुना नञ् इत्यस्य कथनेन द्विविध–प्रतिषेधः भवति— पर्युदासः च प्रसज्यः च | अधातुः, अप्रत्ययः, अप्रत्ययान्तः इत्येतादृशनिषेधः पर्युदासः इत्युच्यते | 'अधातुः' इत्यस्य कथनेन नञ् इत्यस्य इङ्गितमस्ति |

**आदेच उपदेशेऽशिति** (६.१.४५) इत्यस्मिन् यत् नञ् भवति, तत् प्रसज्यप्रतिषेधः | अत्र यदि वदामः यत् अस्य अर्थः एवं यत् उपदेशावस्थायां एजन्तधातोः आत्वादेशः 'अशिति प्रत्यये परे' | 'अशिति प्रत्यये परे' इत्यस्य कथनेन पर्युदासप्रतिषेधः भवति | यदि वदामः यत् "उपदेशावस्थायाम् एजन्तधातोः आत्वादेशः | शिति प्रत्यये परे न भवति", तदा प्रसज्यप्रतिषेधः | 'अशिति प्रत्यये परे' इत्यस्य अर्थः एवं यत् तादृशप्रत्ययः परः भवेत् यः शित् नास्ति— नाम कश्चन प्रत्ययः अपेक्षितः; स च प्रत्ययः शित् न भवेत् | परः शित् प्रत्ययः नास्ति,

शून्यमस्ति, तर्हि एजन्तस्य आत्वं न भवति | यङ्लुकि गै धातुतः यङः लुक् भवति; अस्यां दशायां अशित्–प्रत्ययः परः नस्ति अतः आत्वं न भविष्यति | 'प्रत्ययः भवेत्, शित् न स्यात्', तदा कार्यं जायते | इति चेत् समस्या, यतोहि यङ्लुकि प्रत्ययः एव नास्ति अतः आत्वं न भविष्यति | किन्तु आत्वम् अपेक्षितम् | अतः अत्र प्रसज्यप्रतिषेधः न तु पर्युदासः |

अत्र अस्माकम् इष्टः अर्थः अस्ति यत् "एजन्तधातूनाम् आत्वं भवति— सदैव | शिति प्रत्यये परे न भवति |" इति कृत्वा प्रसज्यप्रतिषेधस्य वदनार्थं वाक्यद्वयं प्रयोक्तव्यं— एकः विधिः यस्य किमपि नियमनं नास्ति, तदा पृथक्तया तस्य निषेधः | एवं वदामः चेत् प्रत्ययः नास्ति चेदपि आत्वं भवति | अतः यङ्लुकि एजन्तानाम् आत्वम् |

**आदेच उपदेशेऽशिति** (६.१.४५) = उपदेशे एजन्तस्य धातोरात्त्वं न तु शिति | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तदन्तविधिः; **अलोन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य अलः स्थाने | एच् इत्यनेन 'ए, ऐ, ओ, औ' | श् इत् यस्य स शित्, न शित् अशित्, तस्मिन् (विषये) अशिति, नञ्तत्पुरुषः | आत् प्रथमान्तम्, एचः षष्ठ्यन्तम्, उपदेशे सप्तम्यन्तम्, अशिति सप्तम्यन्तम्, अनेकपदमिदं सूत्रम् | **लिटि धातोरनभ्यासस्य** (६.१.८) इत्यस्मात् **धातोः** इत्यस्य अनुवृत्तिः | अनुवृत्ति–सहितसूत्रम्— **एचः धातोः आत् उपदेशे अशिति** |

प्रसज्यप्रतिषेधकृतनञ् भवति, पर्युदासप्रतिषेधकृतनञ् भवति | **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति सूत्रे पर्युदासप्रतिषेधः अस्ति | अतः धातोः, प्रत्ययस्य, प्रत्ययान्तस्य च प्रातिपदिकसंज्ञा न भवति | रम् + घञ् → राम–शब्दः | इति कृदन्तरूपम् | **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इत्यनेन राम–शब्दस्य प्रातिपदिकसंज्ञा–निषेधो भवति | तदा **कृत्तद्धितसमासाश्च** (१.२.४६) इति अपवादभूतसूत्रेण अस्य प्रातिपदिकसंज्ञा जायते |

महाभाष्ये प्रसज्यप्रतिषेधस्य दृष्टान्तो दीयते | कोऽपि वदति, "अब्राह्मणम् आनय" | यः ब्राह्मणः नास्ति, तम आनयतु | तदा अस्य श्रवणेन अन्यः काश्चित् मृत्तिकाम् आनीतवान् | उक्तवान् च इयं ब्राह्मणो नास्ति | अनेन चिन्त्यते चेत् बिडालः, कुक्कुरः, यं कमपि आनेतुं शक्यते यः ब्राह्मणः न स्यात् | परन्तु यः प्रार्थनाम् अकरोत्, तस्य आशयः एवम् आसीत् यात् एकः मनुष्यः आनेतव्यः | तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् | यः ब्राह्मणः न स्यात्, किन्तु ब्राह्मणसदृशः | सादृश्यम् अपेक्षितम् | "अब्राह्मणम् आनय" इत्यस्य कथनेन यः आनीयते सः मनुष्यः भवेत् | एवमेव "अशिति प्रत्यये परे" इत्यस्य कथनेन यः परः अस्ति, सः प्रत्ययः भवेत् | अशित् इत्युक्तौ शिद्भिन्नः प्रत्ययः | पर्युदासार्थं सादृश्यम् अपेक्षितम् |

एचः आत्वं तु भवति यङ्लुकि अपि, यत्र प्रत्ययः एव नास्ति, अतः अस्यां दशायां पर्युदासः न कर्तव्यः | अपि तु प्रसज्यप्रतिषेधः आवश्यकः |

अधुना **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति सूत्रे पर्युदासप्रतिषेधो वर्तते | 'अधातुः', 'अप्रत्ययः', अप्रत्ययनान्तः' | **आदेच उपदेशेऽशिति** (६.१.४५) इति स्थितौ पर्युदासप्रतिषेधः वक्तव्यः चेत्, 'अशित्' इत्यस्य कथनेन सादृश्यम् इत्युक्तौ कश्चन प्रत्ययः अपेक्षितः यः शिद्भिन्नः स्यात् | अत्र, **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति स्थितौ 'अधातुः' इत्युक्तौ धातुः न स्यात्, किन्तु भवेत् किम् ? शब्दः | यः अर्थवान् | त्रिषु अपि—धातौ, प्रत्यये, प्रत्ययान्ते—अर्थवत्त्वम् अस्ति | एतादृशशब्दः अपेक्षितः यः अर्थवान् परन्तु धातुः, प्रत्ययः, प्रत्ययान्तश्च न स्यात् | साम्यमपि अपेक्षितं, भिन्नत्वमपि अपेक्षितम् | आहत्य तस्मिन् शब्दत्वम् अपेक्षितं, परन्तु धातुत्वं, प्रत्ययत्वं, प्रत्ययान्तत्वं च न भवेत् | शब्दः इत्युक्तौ यः उच्चारितो भवति | भूयोधर्मवत्त्वं—यावत् शक्यं समानं स्यात्, परन्तु तद्भिन्नत्वम् अपि स्यात् | तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् | "अब्राह्मणम् आनय", तर्हि क्षत्रियः आनेतव्यः | न तु शिलाखण्डः | भूयोधर्मवत्त्वं—बिडालो वा कुक्कुरो वा चेत् पर्याप्तं नास्ति |

पर्युदासप्रतिषेधे सादृश्यम् अपेक्षितं; प्रसज्यप्रतिषेधे सादृश्यं नापेक्षितम् |

तर्हि प्रकृतौ **अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** (१.२.४५) इति सूत्रे पर्युदासप्रतिषेधो वर्तते | स च प्रतिषेधः निषेध एव | नञ् इत्यस्य कथनेन निषेधेन पृथक् करोति, भिन्नतां करोति |